## शरोऽचि । (४९/३४०)

[1]न इति वर्सते । शरोऽचि परतः न द्वे भवतः । '[2]अचो रहाभ्यां द्वे' (८. ४. ४६/५९) इति प्राप्तिः प्रतिषिध्यते । कर्षति । वर्षति । [3]आकर्षः । [4]अक्षदर्शः । अचि इति किम् ? दश्दर्यते ॥

## त्रिप्रभृतिषु शाकटायनस्य । (५०/५६)

[5]त्रिप्रभृतिषु वर्णेषु संयुक्तेषु शाकटायनस्य मतेन [6]द्वित्वं न भवति । [7]इन्द्रः । चन्द्रः । [8]उष्ट्रः । [9]राष्ट्रम् । भ्राष्ट्रम् ॥

## सर्वत्र शाकल्यस्य । (५१/५७)

शाकल्यस्य आचार्यस्य मतेन सर्वत्र [10]द्विर्वचनं न भवति । अर्कः । मर्कः । [11]ब्रह्मा । अपह्नुते ॥

## दीर्घादाचार्याणाम् । (५२/५८)

[12]दीर्घादुत्तरस्य आचार्याणां मतेन न [13]द्वित्वं भवति । दात्रम् । पात्रम् । मूत्रम् । सूत्रम्[14] ॥

## झलां जश् झशि । (५३/५२)

झलां स्थाने [15]जशादेशो भवति झशि परतः । लब्धा । लब्धुम् । लब्धव्यम् । दोग्धा । दोग्धुम् दोग्धव्यम् । बोद्धा । बोद्धुम् । बोद्धव्यम् । झशि इति किम् ? [16]दत्तः । [17]दत्थः । [18]दध्मः ॥

## अभ्यासे चर्च । (५४/२१८२)

अभ्यासे वर्तमानानां झलां [19]चरादेशो भवति, चकाराज् जश् च । चिखनिषति । चिच्छित्सति । टिठकारयिषति । तिष्ठासति । पिफकारयिषति । बुभूषति । जिघत्सति । डुढौकिषते । प्रकृतिचरां प्रकृतिचरो भवन्ति । चिचीषति[20] । टिटीकिषते । तितनिषति । प्रकृतिजशां प्रकृतिजशो भवन्ति । जिजनिषते । बुबुधे । ददौ । डिड्ये ॥

---

1. वाक्यमिदं नास्ति ब. 2. अचः नास्ति ब. ह. 3. आदर्शः, दर्शः ब. क, आदर्शः सुदर्शः इ. 4. अघदर्शः ड. 5. न इति वर्तते इत्यधिकम् क. 6. द्विर्वचनम् इ. 7. मन्द्रः क. 8. उष्ट्रः नास्ति ड. 9. राष्ट्रः भ्राष्ट्रः इ. 10. द्वे न भवतः क. ह. 11. ब्रह्म ड. 12. न इति वर्तते इत्यधिकम् क. ड. 13. द्वे भवतः ब, द्विर्वचनं इ. ह. 14. गात्रम् गोत्रम् इत्यधिकम् क, गोत्रम् इत्यधिकम् ड. . 15. जशः भवन्ति ब. ड. इ. ह. 16. धत्तः ड, अत्तः इ. 17. धत्तः ड. 18. दध्मः नास्ति ब. ह. 19. चरः भवन्ति क. 20. चिचीर्षति तितीर्षति पिपासति इत्यधिकम् क.